रचनात्मक-मूल्याङ्कनम्-१

प्रथमसत्रम्- अप्रैलमासत: सितम्बरमासपर्यन्तम्

कक्षा – सप्तमी विषय : संस्कृतम्  पूर्णाङ्का:  चत्वारिंशत्       (40)

समय : नवति: पलानि

छात्रनाम् : --------------------------------  अनुक्रमाङ्क:-------
----------

दिनांक: ----------------------   दिवस: ----------------

कक्षनिरीक्षक:--------------------------

Edufever™

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति –

**१. अपठित – अवबोधनम् ५अङ्का:**

**२. रचनात्मककार्यम् ५अङ्का:**

**३. अनुप्रयुक्तव्याकरणम् १०अङ्का:**

**४. पठित-अवबोधनम् १८ अङ्का:**

**परीक्षक:-------------**

## खण्ड: क अपठित – अवबोधनम् 5अङ्का:

**१. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत-**

विद्याधनं सर्वश्रेष्ठं सर्वप्रधानं धनम् अस्ति। अन्यानि सर्वाणि धनानि व्यये कृते नश्यन्ति परं विद्याधनं व्यये कृते अपि वर्धते। विद्यया एव नर: उचितानुचितस्य भेदं कर्तुं शक्नोति। विद्यां विना नर: पशुतुल्य: भवति, कदापि सुखी न भवति। विदेशेऽपि विद्या एव मित्रम् भवति।

**एकपदेन उत्तरत-½+२=१**

1. व्यये कृते किं वर्धते?

---------------------------------------------

2. विद्यां विना नर: कीदृश: भवति ?

---------------------------------------------------

**पूर्णवाक्येन उत्तरत- २+१=२**

विद्यया नर: किं कर्तुं शक्नोति ?

------------------------------------------------------------------------------------------------- **भाषिककार्यम्- १+१=२**

१. **" नश्यन्ति "** इति क्रियापदस्य कर्तृपदम् किम् अस्ति ?

अ) अन्यानि ब) धनानि स) सर्वाणि

---------------------------------------------------

२. **" वृद्धि: भवति "** इत्यर्थे अत्र किं पदम् अत्र प्रयुक्तम् ?

अ) नश्यति ब) शक्नोति स) वर्धते

-------------------------------------------------

## खण्ड: ख रचनात्मककार्यम् ५अङ्का:

**२. मञ्जूषात: समुचितपदानि चित्वा कथापूर्तिं कुरुत- {½ ×10= 5}**

| |
|---|
| **नासिकायामेव, वारम्बारम्, खड्गेन, मित्रता, मक्षिका, व्यजनेन, उपाविशत्, छिन्ना, सुप्त:, दूरम्** |

पुरा एकस्य नृपस्य एक: प्रिय: वानर: आसीत्।एकदा नृप: --------------(१) आसीत्। वानर: -------------(२) तम् अवीजयत्। तदैव एका ----------------------(३) नृपस्य नासिकायाम्----------------(४)

यद्यपि वानर:-------------------------(५) व्यजनेन तां निवारयतिस्म तथापि सा पुन: पुन: आगत्य नृपस्य-------------------------(६) उपविशतिस्म। अन्ते स: मक्षिकां हन्तुं--------------------(७) प्रहारम् अकरोत्। मक्षिका तु उड्डीय-----------------(८) गता, किन्तु खड्गप्रहारेण नृपस्य नासिका--------------------(९) अभवत्। अतएव उच्यते-" मूर्खजनै: सह-----------------------(१०) नोचिता " ॥

## खण्ड: ग अनुप्रयुक्तव्याकरणम् 12अङ्का:

**३.अधोलिखितपदानि अशुद्धरूपं चित्वा लिखत- {½ ×4= 2}**

यथा- गमन्ति, यच्छन्ति, पृच्छन्ति, धावन्ति ।--------**गमन्ति**-------------

क) रामेण , गृहेण, सर्पेण, गजेण । ------------------------------------------

ख) लतया, मातया, रमया, निशया । ---------------------------------------

ग) लते, रमे, माते, प्रिये । ----------------------------------------------------

घ) लिखति, गर्जति, फलति, सेवति ।---------------------------------------

**४. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत- {½ ×4= 2}**

१. सद्भिरेव **सहासीत्** ।

अ) सह + आसीत् ब) सहा + आसीत्

स) साह + असीत् द) सहा + आसित्

-------------------------------------------------------------------

२.सत्येन वाति **वायुश्च** ।

अ) वायु + श्च ब) वायु: + च

स) वायू: + च द) वायो: + च

-----------------------------------------------------------------

३. हंसाभ्यां सह **कूर्म: + अपि** उड्डीयते।

अ) कूर्मापि ब) कूर्माऽपि

स) कूर्मोऽपि द) कोर्मोऽपि

४. **स्व+ अवलम्बने** तु सर्वदा सुखमेव।

अ) स्ववलम्बने  ब) स्वावालम्बने

स) स्वलम्बने  द) स्वावलम्बने

**५. मञ्जूषात: संख्यात्मकपदानि चित्वा रिक्तस्थानानि पूरयत{½ ×६= ३}**

| षड् , त्रिंशत् , एकत्रिंशत् , द्वौ , द्वादश , अष्टाविंशति: |
|---|

(क) एकस्मिन् वर्षे-----------------------ऋतव: भवन्ति।

(ख) मासा: -------------------भवन्ति।

(ग) एकस्मिन् मासे-------------------अथवा----------------दिवसा: भवन्ति।

(घ) फरवरीमासे सामान्यत:-----------------दिनानि भवन्ति।

(ङ) मम शरीरे -----------------हस्तौ स्त:।

**६. मञ्जूषात: अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत--  {½ ×4= 2}**

| **अलम् , , बहि: , अध: , उपरि** |
|---|

(क)- वृक्षस्य-----------------खगा: वसन्ति।

(ख) ---------------विवादेन।

(ग) वर्षाकाले गृहात्--------------------मा गच्छ।

(घ) मञ्चस्य ------------------श्रोतार: उपविष्टा: सन्ति।

**७. मञ्जूषात: पदानि चित्वा लिङ्गानुसारं लिखत–१+३=३**

**पुर्ल्लिगम्  स्त्रीलिंगम्  नपुंसकलिंगम्**

---------------- -------------------- ----------------------

------------------- -------------------- ---------------------

------------------- ---------------------- -----------------------

| **रत्नानि, वसुन्धरा, सत्येन, पत्रम्, अन्नम्, वह्नि:, रवि:, पृथ्वी, सङ्गतिम्** |
|---|

## खण्ड: घ  पठित-अवबोधनम्  18अङ्का:

**८.अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत1+5=5**

कृष्णमूर्तिः श्रीकण्ठश्च मित्रे आस्ताम्।श्रीकण्ठस्य पिता समृद्धः आसीत्। अतः तस्य भवने सर्वविधानि सुख-साधनानि आसन्। तस्मिन् विशाले भवने चत्वारिंशत् स्तम्भाः आसन्। तस्य अष्टादश-प्रकोष्ठेषु पञ्चाशत् गवाक्षाः,चतुश्चत्वारिंशत् द्वाराणि, षट्त्रिंशत् विद्युत्-व्यजनानि च आसन्। तत्र दश सेवकाः निरन्तरं कार्यं कुर्वन्तिस्म। परं कृष्णमूर्तेः माता पिता च निर्धनौ कृषकदम्पती। तस्य गृहम् आडम्बरविहीनं साधारणञ्च॥

**एकपदेन उत्तरत-**

१. श्रीकण्ठस्य पिता कीदृशः आसीत्?

------------------------------------------------------

२. कस्य माता पिता च निर्धनौ कृषकदम्पती आस्ताम्?

-------------------------------------------------------

**पूर्णवाक्येन उत्तरत-**

श्रीकण्ठस्य भवने कति विधानि सुखसाधनानि आसन्?

---------------------------------------------------------------------------------------

Edufever™

**भाषिककार्यम्-**

१. '**समृद्धः**' पदस्य विशेष्यपदं चिनुत-

(अ) पिता (ब) श्रीकण्ठः (स) कृष्णमूर्तिः

---------------------------------------------------------

२. '**कुर्वन्तिस्म**' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(अ) दश (ब) साधनानि (स) सेवकाः

-----------------------------------------------------------------

**९.अधोलिखितवाक्यानि कः कं प्रति कथयति इति लिखत{½ × 8 =4 }**

वाक्यानि कः कथयति कं प्रति कथयति

यथा-प्रातः यद् उचितं तत्कर्तव्यम्। हंसौ------------- -----कूर्मम्------

१.अत्र क: उपाय:?  ----------------  -----------------

२.यूयम् भस्म खादत। -----------------  -----------------

३.अहम् उत्तरं न दास्यामि। ----------------  ----------------

४.अहं भवद्भ्यां सह आकाश- -----------------  ----------------

मार्गेण गन्तुम् इच्छामि।

**१०.रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- 1+5=5**

१. **<u>स्त्रिय:</u>** शिक्षां लभन्ते स्म।

---------------------------------------------------------------------------------?

२.**<u>रमाया:</u>** पिता समाजस्य प्रतारणाम् असहत्।

--------------------------------------------------------------------------------?

३. **<u>वसुन्धरा</u>** बहुरत्ना भवति।

---------------------------------------------------------------------------------?

४.**<u>सत्येन</u>** वायु: वाति।

---------------------------------------------------------------------------------?

५.**<u>विद्याया:</u>** संग्रहेषु त्यक्तलज्ज: सुखी भवेत्।

-----------------------------------------------------------------------------------?

**११. अधोलिखितवाक्यानि घटनाक्रमानुसारं पुन: लिखत  {½ × 8 =4 }**

१.कूर्म: हंसयो: सहातया आकाशमार्गेण अगच्छत्।

२.गोपालका: अकथयन्- वयं पतितं कूर्मं खादिष्याम:।

३.कूर्म: हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

४. केचित् धीवरा: सरस्तीरे आगच्छन्।

५. कूर्म: अन्यत्र गन्तुम् इच्छति स्म।

६. लम्बमानं कूर्मं दृष्ट्वा गोपालका: अधावन्।

७. कूर्म: आकाशात् पतित: गोपालकै: मारितश्च।



Edufever™

८.'वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः' इति धीवराः अकथयन्।

------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------------------------
------------------------------------------------------------------------------------------

## उत्तरमाला

१. (I) विद्याधनम् , पशुतुल्यः

(II) विद्या एव नरः उचितानुचितस्य निर्णयं कर्तुं शक्नोति।

(III) (ब) धनानि, (स) वर्धते

२. सुप्तः, व्यजनेन, मक्षिका, उपाविशत्, वारम्बारम्, नासिकायामेव, खड्गेन, दूरम्, छिन्ना, मित्रता॥

३. गजेण, मातया, माते, सेवति।

४. सह+आसीत्(अ),वायुः+च(ब), कूर्मोऽपि(स), स्वावलम्बने(द)।

५. षड्,द्वादश, त्रिंशत्,एकत्रिंशत्, अष्टाविंशतिः, द्वौ॥

६. उपरि, अलम्, बहिः, अधः॥

७. पुल्लिंगम् स्त्रीलिंगम् नपुंसकलिंगम्

| पुल्लिंगम् | स्त्रीलिंगम् | नपुंसकलिंगम् |
|---|---|---|
| सत्येन, | वसुन्धरा | अन्नम् |
| रविः | पृथ्वी | रत्नानि |
| वह्निः | सङ्गतिम् | पत्रम् |

८. १. समृद्धः, कृष्णमूर्तेः।

२. श्रीकण्ठस्य भवने सर्वविधानि सुखसाधनानि आसन्।

३. (ब) श्रीकण्ठः , (स) सेवकाः

९.१. हंसौ कूर्मः

Edufever™

२. कूर्म: गोपालका:

३. कूर्म: हंसौ

४. कूर्म: हंसौ

१०. का: , कस्या:, का, केन, कस्या: ॥

११.1. कूर्म: हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

2.केचित् धीवरा: सरस्तीरे आगच्छन्।

3.'वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:' इति धीवरा: अकथयन्

4. कूर्म: अन्यत्र गन्तुम् इच्छति स्म।

5. कूर्म: हंसयो: सहातया आकाशमार्गेण अगच्छत्।

6.लम्बमानं कूर्मं दृष्ट्वा गोपालका: अधावन्।

7.गोपालका: अकथयन्- वयं पतितं कूर्मं खादिष्याम:।

8.कूर्म: आकाशात् पतित: गोपालकै: मारितश्च।

Edufever™

।